प्रियतमः, पुं, मयूरशिखावृक्षः। इति शब्द-चन्द्रिका ॥ (अयमेषामतिशयेन प्रियः। प्रिय+तमप्।) अतिशयप्रिये, त्रि ॥

प्रियतरः, त्रि, (अयमनयोरतिशयेन प्रियः। प्रिय+तरप्।) अनयोरतिशयेन प्रियः। इति व्याकरणम् ॥ (यथा, गो० रामायणे। २। ३६। ७।
"प्राणेभ्योऽपि प्रियतरो ज्येष्ठो भ्राता गुरुश्च ते।
तस्मादस्य प्रयत्नेन त्वं शरीरं प्रतिपालय ॥")

प्रियता, स्त्री, (प्रिय+तल्।) प्रियस्य भावः। हार्द्दम्। इत्यमरः। १।७।२७ ॥ (यथा, मनुः। ५।५०।
"न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥")

प्रियतोषणः, पुं, (प्रियस्य तोषणं यस्मात्। यद्वा, प्रियं तोषयतीति। तुष+णिच्+ल्युः।) षोड़शबन्धातिरिक्तरतिबन्धविशेषः। तस्य लक्षणं यथा,—
"नारी पादौ स्वहस्तेन धारयेत्स्तनोपरि।
स्वजापीड़करः कामी कामयेत् प्रियतोषणः ॥"
इति रतिमञ्जरी ॥
प्रियस्य तुष्टिकारिणि, त्रि ॥

प्रियत्वं, क्ली, (प्रियस्य भावः। प्रिय+त्व।) प्रियता। तत्पर्य्यायः। प्रेम २ प्रेमा ३ स्नेहः ४ प्रणयः ५ हार्द्दम् ६ प्रियता ७ स्निग्धता ८। इति शब्दरत्नावली ॥

प्रियदर्शनः, त्रि, (प्रियं दर्शनं यस्य।) सुदृश्यः। तत्पर्य्यायः। चक्षुष्यः २। इति जटाधरः ॥ (यथा, रघुः। १। ४७।
"तत्तद्भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥")

प्रियदर्शनः, पुं, (प्रियं दर्शनं यस्य।) शुकपक्षी। क्षीरिकावृक्षः। इति जटाधरः ॥ (गन्धर्व्व-विशेषः। यथा, रघुः। ५। ५३।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य ॥")

प्रियप्रायं, क्ली, (प्रियस्य प्रायो यत्र।) प्रिय-वाक्यम्। तत्पर्य्यायः। चटु २ चाटु ३। इति हेमचन्द्रः। २। १७८ ॥

प्रियप्रेप्सुः, त्रि, (प्रियं प्रेप्सतीति। प्र+आप्+सन्+उः।) इष्टार्थोद्युक्तम्। उत्सुकः। इति जटाधरः ॥

प्रियमधुः, पुं, (प्रियं मधु मद्यं यस्य।) बलरामः। इति हेमचन्द्रः। २। १३८ ॥

प्रियवर्णी, स्त्री, (प्रियो वर्णो यस्याः। गौरादित्वात् ङीष्।) प्रियङ्गुः। इति जटाधरः ॥

प्रियवल्ली, स्त्री, (प्रिया मनोज्ञा वल्ली लता।) प्रियङ्गुः। इति राजनिर्घण्टः ॥

प्रियवादी, [न्] त्रि, (प्रियं मनोज्ञं वदतीति। वद्+णिनिः।) मनोज्ञवक्ता। यथा, चाणक्ये।
"कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥"
(यथा च पञ्चतन्त्रे। २। १७४।
"सुलभाः पुरुषा राजन्! सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥")

प्रियव्रतः, पुं, (प्रियं व्रतं यस्य।) स्वायम्भुवमनु-पुत्त्रः। यथा,—
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्त्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥"
इत्यग्निपुराणम् ॥
(प्रियाणि व्रतानि यस्येति विग्रहे व्रतप्रिये, त्रि। यथा, ऋग्वेदे। १०। १५०। ३।
"अच्छे देवानावह नः प्रियव्रतान्
मृळीकाय प्रियव्रतान् ॥")

प्रियसखः, पुं, (प्रियः सखा च हितकारित्वात्। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) खदिरः। इति शब्दचन्द्रिका ॥ प्रियश्चासौ सखा चेति। (प्रियबन्धुः। यथा, मेघदूते। १२।
"आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम् ॥")
प्रियस्य सखा इति च। इति व्याकरणम् ॥

प्रियसत्यं, क्ली, (प्रियं सत्यमिति कर्म्मधारयः।) सुनृतवाक्यम्। इति हेमचन्द्रः। २। १७८ ॥ (प्रियं सत्यं यस्येति विग्रहे सत्यप्रिये, त्रि ॥)

प्रियसन्देशः, पुं, (प्रियं सन्दिशतीति। प्रिय+सम्+दिश+अण्।) चम्पकवृक्षः। इति शब्द-चन्द्रिका ॥ (प्रियः सन्देश इति कर्म्मधारयः।) प्रियसंवादश्च ॥

प्रियसालकः, पुं, (प्रियः सालः। ततः स्वार्थे कन्।) असनवृक्षः। इति राजनिर्घण्टः ॥ पेयासाल इति ख्यातः ॥

प्रिया, स्त्री, (प्रिय+टाप्।) नारी। इति शब्द-रत्नावली ॥ भार्य्या। इति हेमचन्द्रः ॥ (यथा, कुमारे। ३। ३८।
"पुष्पासवाघूर्णितनेत्रशोभि
प्रियामुखं किम्पुरुषश्चुचुम्बे ॥")
एला। इति शब्दचन्द्रिका। मल्लिका। मदिरा। इति राजनिर्घण्टः ॥ वार्त्ता। इति धरणिः ॥ (पञ्चाक्षरच्छन्दोविशेषः। इति छन्दोमञ्जरी ॥)

प्रियाम्बुः, पुं, (प्रियमम्बु यस्य।) आम्रवृक्षः। इति राजनिर्घण्टः ॥ तत्पक्षे कृष्णजले च क्ली ॥ (जलप्रिये, त्रि ॥)

प्रियालः, पुं, (प्रियाय हिताय अलति पर्य्याप्नो-तीति। अल+अच्।) वृक्षभेदः। पियाल इति भाषा। अस्य बीजं चिरञ्जीति प्रसिद्धम्। तत्पर्य्यायः। चारः २ अखट्टः ३ खरस्कन्धः ४ ललनः ५ चारकः ६ बहुवल्कः ७ सन्नद्रुः ८ तापसप्रियः ९ स्नेहबीजः १० उपवटः ११ मन्द-वीर्य्यः १२। इति राजनिर्घण्टः ॥ पियालः १३। इत्यमरः। २।४।३५ ॥ बहुलवल्कलः १४ राजादनम् १५ तापसेष्टः १६ सन्नकद्रुः १७ धनुःपटः १८। अस्य गुणः। पित्तकफास्रनाशित्वम् ॥ तत्फल-गुणाः। मधुरत्वम्। गुरुत्वम्। स्निग्धत्वम्। सर-त्वम्। मरुत्पित्तदाहज्वरतृष्णापहत्वञ्च। तन्मज्ज-गुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तानिलाप-हत्वम्। हृद्यत्वम्। दुर्ज्जरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भाव-प्रकाशः ॥ अपि च।
"चारस्य च फलं पक्वं वृष्यं गौल्याम्लकं गुरु।
तद्बीजं मधुरं वृष्यं पित्तदाहार्त्तिनाशनम् ॥"
इति राजनिर्घण्टः ॥

प्रियाला, स्त्री, (प्रियाय अलतीति। अल+अच्+टाप्।) द्राक्षा। इति राजनिर्घण्टः ॥

प्रियोदितं, त्रि, (प्रियाय प्रियेण वा यदुदितम्। प्रियमुदितमिति वा।) चाटुवाक्यम्। इति शब्दरत्नावली ॥ प्रियवाक्यविषयः ॥ (प्रिय-कथितवाक्यञ्च ॥)

प्री, क तर्पणे। इति कविकल्पद्रुमः ॥ (चुरा० पर०-सक०-अनिट्।) क, यं प्राययन्ति कवि-स्तुक्तिरसायनानि। इति हलायुधः ॥ प्रीणयत्य-प्रीति केचित्। इति दुर्गादासः ॥

प्री, ङ य प्रीतौ। कान्तौ। इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट्।) प्रीतिरिह प्रीतीभावः। ङ य, यः प्रीयते प्रणयिषु। इति हलायुधः। इति दुर्गादासः ॥

प्री, ञ तर्पणे। इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट्।) ञ, प्रयति प्रयते। इति दुर्गादासः ॥

प्री, ञ श कान्तौ। तर्पणे। इति कविकल्पद्रुमः ॥ (क्र्या०-उभ०-अक०-सक० च-अनिट्।) तर्पण-मिह प्रीतीभावः प्रीतीकरणञ्च। ञ श, प्रभुः प्रीणातु विश्वभुक्। प्रीणाति बान्धवजनानिति हलायुधः। प्रीणीते। इति दुर्गादासः ॥

प्रीः, स्त्री, (प्री+क्विप्।) प्रीतिः। इति कवि-धातुटीकायां दुर्गादासः ॥ प्रथमा विभक्तिः। यथा, "त्रिशः प्रीद्वीत्रीचीपीपीप्राः। स्वादीनि त्रीणि त्रीणि क्रमात् प्रीद्वीत्रीचीपीपीप्रा-संज्ञानि स्युः।" इति मुग्धबोधव्याकरणम् ॥

प्रीणः, त्रि, (प्र+"नश्च पुराणे प्रात्।" ५।४।२५। इत्यस्य वार्त्तिकोक्त्या खः।) पुरातनः। इति त्रिकाण्डशेषः ॥ प्रीतः। इति व्याकरणम् ॥

प्रीणनं, क्ली, (प्री+स्वार्थे णिच्+ल्युट्। धूञ्प्रीञोरिति नुक्।) तृप्तिकरणम्। तत्पर्य्यायः। तर्पणम् २ अवनम् ३। इत्यमरः। ३। २। १ ॥ (यथा, महानिर्व्वाणतन्त्रे। २। ४७।
"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्।
तदाराधनतो देवि! सर्व्वेषां प्रीणनं भवेत् ॥")

प्रीणसः, पुं, गण्डकः। इति राजनिर्घण्टः ॥

प्रीतः, त्रि, (प्रीञ् प्रीणने+क्तः।) प्रीतियुक्तः। तत्पर्य्यायः। हृष्टः २ मत्तः ३ तृप्तः ४ प्रह्लन्नः ५ प्रमुदितः ६। इत्यमरः। ३।१।१०३ ॥ हृषितः ७। (यथा, महाभारते। ४। ४०। २।
"प्रीतोऽस्मि पुरुषव्याघ्र! न भयं विद्यते तव।
सर्व्वांस्तुदामि ते शत्रून् रणे रणविशारद! ॥")
क्ली, नर्म्म। इति मेदिनी। ते, ३३ ॥

प्रीतिः, स्त्री, (प्रीञ् तर्पणे+भावे क्तिन्।) तृप्तिः। (यथा, रामायणे। १। ६८। १२।